
REET 2025
LEVEL-1&2
वंदन बैच
संस्कृत
संस्कृतशिक्षणे अधिगम साधनानि
LIVE
18-02-2025 03:00 PM

# "संस्कृत भाषा-शिक्षण-विधयः" (भाषा प्रथम व भाषा द्वितीय दोनों के लिए)

संस्कृत शिक्षा प्राचीनकालात् प्रचलति। अतः प्राचीनकालात् वर्तमानकाले संस्कृतशिक्षणस्य अतीव महत्वं वर्तते। संस्कृत शिक्षणं केन-केन विधिना प्राचीनकाले प्रदीयते स्म? आधुनिक काले शिक्षणमिदं कथं प्रचलति ? कथं प्रचाल्येत, एतेषां प्रश्नानां समाधानाय संस्कृत शिक्षणस्य विधयः त्रिषु भागेषु विभक्तुं शक्यते-

1. प्राचीन विधिः
2. नवीन विधिः
3. नवीनतम विधिः

## संस्कृतशिक्षणस्य नवीनतमाः उपायाः

संस्कृतशिक्षणं रोचकं, आकर्षकं, अवगम्यमानं च कर्तुं आधुनिकवैज्ञानिकपद्धतिभिः प्रयोक्तुं शक्यते। केचन मुख्यविधयः यथा-

### 1. सूक्ष्मशिक्षणम्

MT

विशिष्टकौशलेषु शिक्षकान् प्रवीणान् कर्तुं प्रक्रिया।

एम.बी. बुच् इत्यस्य मते एषा पद्धतिः शिक्षकप्रशिक्षणार्थम् अत्यन्तं प्रभावी अस्ति।

### 2. आगमनात्मक विधि

उदाहरण / समस्या → नियम / सिद्धांत

हिल्डात्बा इत्यनेन विकसिता एषा पद्धतिः छात्रं समस्यानां विश्लेषणं समाधानं च कर्तुं समर्थयति।

REEET 2025 L-1&2 संस्कृत वंदन बैच

**3. समस्यानिराकरणदृष्टिकोणः** उच्च स्तर

छात्राः स्वचिन्तनस्य, तर्कस्य, अवलोकनस्य च माध्यमेन समस्यानां समाधानं प्राप्नुवन्ति।

सुकरातस्य संवादेषु अपि एषा पद्धतिः प्रयुक्ता अस्ति। सुकरात :- प्रश्नोत्तर

**4. परियोजना-आधारित-शिक्षणम्**

छात्राः समस्यायाः समाधानार्थं आवश्यकं सामग्रीं अन्वेष्टुं विश्लेषितुं च प्रेरिताः भवन्ति।

**5. दलशिक्षणम्**

अध्यापनक्षेत्रे विभिन्नविषयाणां विशेषज्ञाः मिलित्वा पाठयन्ति।

## 6. अवलोकन-आधारितं शिक्षणम्

पारम्परिकशिक्षायाः दोषान् दूरीकर्तुं एकः प्रयासः।
छात्राः कार्यस्य अवलोकनेन स्वयमेव शिक्षन्ति।

## 7. कम्प्यूटर-आधारित-शिक्षणम्

अङ्कीयरूपेण संस्कृतं सुलभं रोचकं च कर्तुं कम्प्यूटरस्य, कृत्रिमबुद्धेः च उपयोगः।

## 8. संचार-आधारित-शिक्षणम्

छात्राणां संचारकौशलं वर्धयितुं बलं दत्तम्।
सामाजिकपरिस्थितौ भाषायाः व्यावहारिकप्रयोगे बलं दत्तम्।

**9. प्रोग्रामेड् लर्निंग्  अभिक्रमित अधिगम**

अध्यापनस्य क्रमिकविधिप्रयोगः।

तस्य त्रिविधं भवति- .

1. रेखीय प्रोग्रामिंग
2. शाखाकरण प्रोग्रामिंग
3. संरचनात्मक प्रोग्रामिंग

**10. संरचनात्मक दृष्टिकोण**

संस्कृतशिक्षणे वाक्यसंरचनायां प्रयोगे च ध्यानं ददातु।

भाषाशिक्षणार्थं "प्रत्यक्षविधिः" प्राधान्यं भवति ।

## निष्कर्ष

संस्कृतशिक्षणं आधुनिकं प्रभावी च कर्तुं एताः नवीनतमाः पद्धतयः स्वीक्रियितुं शक्यन्ते, येन एषः विषयः छात्राणां कृते अधिकं रोचकः उपयोगी च भवितुम् अर्हति ।

सूक्ष्मशिक्षणं कस्य कृते उपयोगी अस्ति ?

क) छात्राणां कृते गणितं पाठयितुं

ख) शिक्षकानां कौशलविकासाय

ग) सङ्गीतशिक्षायाः कृते

घ) क्रीडाप्रशिक्षणार्थम्

**Inductive Method केन विकसितम् आसीत् ?**

क) सुकरात

ख) हिल्डा ताबा

ग) एम.बी. बुच्

घ) क्लाउस्मेजर

आगमनात्मक पद्धति

समस्यानिराकरणपद्धत्यां किं महत्त्वपूर्णम् ?

क) संकुचितः

ख) चिन्तनम्, तर्कः, अवलोकनं च

ग) केवलं पाठ्यपुस्तकस्य पठनम्

घ) अध्यापकव्याख्यानम्

दलशिक्षणे किं भवति ?

क) एकः आचार्यः पाठयति

ख) विभिन्नविषयाणां विशेषज्ञशिक्षकाः मिलित्वा पाठयन्ति

ग) छात्राः स्वयमेव पठन्ति

घ) केवलं ऑनलाइन शिक्षणं भवति

पर्यवेक्षिते अध्ययने किं भवति ?

क) छात्राः स्वयमेव पठन्ति

ख) छात्राः शिक्षकस्य निरीक्षणे अध्ययनं कुर्वन्ति

ग) केवलं ऑनलाइन अध्ययनं भवति

घ) केवलं समूहचर्चा एव भवति

## संस्कृताध्यापनस्य अधिगमसाधनानि, संस्कृतशिक्षणे संप्रेषणस्य साधनानि, संस्कृत पाठ्यपुस्तकानि

( भाषा प्रथम व भाषा द्वितीय दोनों के लिए)

संस्कृतभाषाशिक्षणं प्रभावी, सुगमं च कर्तुं विविधसम्पदां, संचारसाधनानाम्, पाठ्यपुस्तकानां च भूमिका अतीव महत्त्वपूर्णा अस्ति। एते न केवलं छात्राणां रुचिं जनयन्ति अपितु शिक्षणप्रक्रिया रोचकं सरलं च कुर्वन्ति।

## निम्नोक्तकारणैः दृश्यश्रव्यसाधनानि महत्त्वं भजन्ते-

- अध्ययनसमये श्रवणेन्द्रियस्य, दर्शनेन्द्रियस्य च आकर्षणम्।
- पाठ्यवस्तु सार्थकं, सुग्राह्यञ्च कर्त्तव्यम्।
- लब्धं ज्ञानं परिपुष्टं स्यात्।
- शिक्षणं प्रभावपूर्णं स्यात्।



## संस्कृतशिक्षेण उपयुक्तानि दृश्यश्रव्यसाधनानि

• **दृश्यसाधनानि** - वर्णानां पदार्थनाञ्च स्वरूपं प्रदर्शयितुम् उपयुज्यमानानि साधनानि दृश्यसाधनानि भवन्ति।

श्यामपट्टः, चित्राणि, रेखाचित्राणि, मानचित्राणि, प्रतिकृतयः प्रदर्शिनी इत्यादीनि दृश्यसाधनानि सन्ति।

• **श्रव्यसाधनानि** - विभिन्नान् ध्वनीन् शब्दान् च श्रोतुमुपयुक्तानि साधनानि श्रव्यसाधनानि भवन्ति। रेडियो, ग्रामोफोन्, टेपरिकार्डर इत्यादीनि श्रव्य-साधनानि सन्ति।

- द्रष्टुं, श्रोतञ्च उपयुक्तानि साधनानि दृश्यश्रव्यसाधनानि भवन्ति। यथा- नाटकम्, चलचित्राणि, दूरदर्शनम्।

## • संस्कृतशिक्षणे दृश्यश्रव्यसाधनानां प्रयोगः

- **श्यामपट्टः**- कस्मिन् अपि कक्षाकक्षे श्यामपट्टः, वर्णदृष्ट्या - श्यामः, हरितः, पीतः श्वेतपट्टच। संस्कृतशिक्षणे अक्षरविन्यासस्य व्याख्या, पाठ्यविषयस्य स्पष्टीकरणं, कठिनशब्दानां व्याख्या, सन्धिविच्छेदः समासविग्रहः, व्याकरणनियमानां व्याख्या इत्यादीनां विषयाणां बोधनाय श्यामपट्टस्य साहाय्यम् अनिवार्यं भवति। चित्राणि, रेखाचित्राणि, मानचित्राणि च श्यामपट्टे विरच्य अध्यापकः शिक्षणं बलवत्तरं कर्तुमर्हति। अध्यापकस्य लेखनं स्पष्टं, शुद्धं, सुन्दरञ्चस्यात् ।

- **चित्राणि**- संस्कृतभाषा शिक्षणं रोचकं सुग्राह्यं च विधातुं शिक्षकः वर्णयुतानाम् आकर्षकचित्राणां प्रयोगं कर्तुं शक्नोति। चित्रामाध्ययेन अमूर्तवस्तुनः वा तस्य सङ्कल्पना मूर्तिमान् भवति। गद्यपद्यशिक्षणसमये कक्षायाः उपयुक्तं वातावरणं निर्मातुं प्राकृतिकदृश्यानां महापुरुषाणां ऐतिहासिक चित्रानाश प्रयोगः कर्तुं शक्यते। विशेषतः संस्कृतमाध्यमेन अध्यापनीय कक्षायां चित्राणां प्रयोगः अतिलाभदायको भवति।

- **मानचित्राणि** - संस्कृतभाषाशिक्षणसमये छात्रान् कस्यापि नगरस्य ऐतिहासिकी भौगोलिकों च स्थितिम् अवबोधायितुं मानचित्रे। प्रयोगः कर्तुं शक्यते यथा-नालन्दा-तक्षशिला विक्रमशिलादेः स्थितिर्दर्शनार्थम्।

- **रेखाचित्राणि -** रेखाभिः आकृतिं विलिख्य अपि विषयवस्तु स्पष्टयितुं शक्यते। कस्यापि विधेः वर्गीकरणस्य प्रदर्शनार्थ रेखाचित्राणि सहायकानि भवन्ति यथा व्याकरणशिक्षण- समये सन्धि समास प्रत्ययोपसर्गादेः भेदप्रदर्शनार्थ पाठे आगताः एतादृशाः शब्दाः ये आकृतिभिः सम्बन्धिताः विद्यन्ते यथा-आयताकार-वृत्ताकार-गोलाकाराऽऽदयः।

- **प्रतिकृतिः-** येन प्रकारेण शैक्षिक भ्रमणेन छात्राः कस्यापि पर्वतीयस्थलस्य, औद्योगिकस्थलानां, शैक्षिकसंस्थादीनां साक्षात् दर्शनेन ज्ञानं प्राप्नुवन्ति तथैव पाठे आगतानां कतिपय अंशानां ऐतिहासिक स्मारकादीनां प्रतिकृत्तिं प्रस्तुतीकृत्य छात्रेभ्यः वास्तविकं ज्ञानं दातु शक्यते।

• **आकाशवाणी-** विभिन्नविषयाणां शिक्षणाय आकाशवाण्याः उपयोगः क्रियते। भाषाविशेषज्ञाः विद्वांसः प्रत्येकं विद्यालयान् गन्तुं न प्रभवन्ति। अतः तेषां प्रभाषणानि आकाशवाण्या प्रसार्यन्ते। संस्कृतवार्तानां, साहित्यिक-कार्यक्रमाणां, संस्कृतपाठानाञ्च आकाशवाण्या प्रसारितानां श्रवणस्य प्रवृत्तिः अध्यापकेन छात्रेषु उत्पादनीया।

• **ग्रामोफोन-** श्रव्योपकरणेषु ग्रामोफोनस्य स्वकीयं महत्त्वमस्ति। केनचिद् द्रव्येण निर्मिते चक्रे रेखारूपेण ध्वनीनां मुद्रणं क्रियते। कविताावाचने, वार्तालापे, संवादे भाषणशिक्षणे चास्य उपयोगः कर्तुं शक्यते। संस्कृतपद्यानि गानानि, विदुषां व्याख्यानानि च अनेन यन्त्रेण श्रोतुं शक्यत्ते। अंत्र मुद्रितं स्थिरं भवति।

- **नाटकम्-** संस्कृतशिक्षणे नाटकस्यापि महत्त्वम् अस्ति। मुद्राराक्षसम्, अभिज्ञानशकुन्तलम्, इत्यादीनि अनेकानि नाटकानि रङ्गमचे अभिनेतुं शक्यन्ते। वाचिकः, आङ्गिकः, सात्विकः आहार्यश्चेति चतुर्विधोऽभिनयो वर्तते।

- **टेलीविजन् (दूरदर्शनम्)** - रेडियोयन्त्रस्य विकसितं रूपं भवति टेलीविजन् यन्त्रं यन्त्र शब्देन साकं चित्रमपि द्रष्टुं शक्यते। एतत् अति उत्तमं दृश्यश्रव्यसाधनं भवति। यदि उचिताः संस्कृतकार्यक्रमाः दूरदर्शनेन प्रसार्यन्ते तर्हि संस्कृतशिक्षणेऽस्य उपयोगो भवति।

- **सङ्गणकयन्त्रम्-** अयं सङ्गणकयुगः इति प्रख्यापयन्ति विज्ञाः। अनेन एकेनैव यन्त्रेण पूर्वोक्तानां सर्वेषां दृश्यश्रव्य उपकरणानां कार्यं सम्पादयितुं शक्यते। अस्मिन् प्रक्षेपकयन्त्रस्य संयोजनेन अपेक्षितं सर्वं कक्षायां, यवनिकायां बृहद्रूपेण प्रदर्शयितुं शक्यते। संस्कृतभाषाशिक्षणाय, संस्कृतशिक्षकाणां प्रशिक्षणाय च निर्मिताः सान्द्रमुद्रिकाः अत्र प्रयोक्तुं शक्यन्ते।

- **अन्तर्जालम्**- सर्वत्र विश्वे प्राज्ञैः समार्जितम्, अतिप्राचीनम्, अतिनवीनं वा सर्वविधं विज्ञानं स्वप्रकोष्ठे उपविश्य अन्तर्जालद्वारा प्राप्तुं शक्यते। विश्वस्य विविधकोणेषु स्थितेषु ग्रन्थालयेषु विद्यमानाः ग्रन्थाः अन्तर्जालद्वारा प्रातुं शक्यन्ते। सङ्गणकयन्त्रे मोडेम् इति घटकस्य दूरवाण्याच संयोजनेन अन्तर्जालेषु विद्यमानः सर्वेऽपि समाचाराः उपलभ्यते। वैद्युतसम्प्रेषण द्वारा विचारविनिमयः लिखितरूपेण सम्भवति। शिरस्पट्टिकायाः ध्वनिश्रावकस्य च संयोजनेन परस्परं दर्शनं, सम्भाषणं शिक्षणञ्च सुसाधमरित।
- भाषाप्रयोगशाला अद्यत्वे भाषाप्रयोगशालायां श्रव्यसाधनेन सह दृश्यसुविधाऽपि विद्यते, अतः इयं दृश्यश्रव्यसाधनेऽपि आयाति।

# पाठ्यपुस्तकानां महत्त्वम्

संस्कृतभाषाशिक्षणे पाठ्यपुस्तकानां मौलिकभूमिका भवति।

आदर्शपाठ्यपुस्तकानां लक्षणं निम्नलिखितम् अस्ति :-

**सरलं अवगम्यमानं च भाषा :** येन छात्राः सहजतया अवगन्तुं शक्नुवन्ति।

**चित्राणां चार्ट्स् च समावेशः :** विषयं अधिकं स्पष्टं कर्तुं।

**व्याकरणस्य नियमाः उदाहरणानि च :** व्यावहारिक-उदाहरणानां माध्यमेन नियमाः प्रस्तुताः भवेयुः।

**अभ्यासप्रश्नाः** : विभिन्नस्तरस्य प्रश्नाः समाविष्टाः भवेयुः येन छात्राः स्वयमेव मूल्याङ्कनं कर्तुं शक्नुवन्ति।

**संस्कृतसाहित्यस्य समावेशः** : श्लोकाः, सुभाषितानि, नित्यकालः, नाटकानि च छात्राणां भाषायाः वास्तविकप्रयोगं अवगन्तुं साहाय्यं कुर्वन्ति ।

## निष्कर्ष

संस्कृतशिक्षणे समुचितसंसाधनैः, संचारसाधनैः, पाठ्यपुस्तकैः च शिक्षणप्रक्रिया अधिका प्रभावी, रोचकः, उपयोगी च कर्तुं शक्यते। यदि आधुनिकविधिषु समावेशः क्रियते तर्हि संस्कृतशिक्षणम् अपि सुगमं आकर्षकं च भवितुम् अर्हति।

1. दृश्यश्रव्यसाधनानि शिक्षणस्य कस्य लाभं कुर्वन्ति?

(A) केवलं शिक्षकस्य

(B) केवलं छात्राणाम्

(C) शिक्षक-छात्रयोः उभयोः

(D) विद्यालयस्य

2. निम्नलिखितेषु कः दृश्यसाधनं न अस्ति?

(A) श्यामपट्टः

(B) चित्राणि

(C) ग्रामोफोन्

(D) प्रतिकृतयः

REET 2025 L-1&2 संस्कृत वंदन बैच

संस्कृत शिक्षाय उपयोगी दृश्यश्रव्यसाधनं किम्?

(A) नाटकं

(B) चलचित्राणि

(C) दूरदर्शनम्

(D) एते सर्वे

रात 8 से 10

सुबह 7-9am

26 फरवरी

"नालन्दा-तक्षशिला" इत्यादीनां स्थानानां अध्ययनार्थं कः उपयुक्तः?

(A) चित्राणि

(B) मानचित्राणि

(C) टेलीविजन्

(D) नाटकम्

"संस्कृतशिक्षणे टेलीविजन् इत्यस्य उपयोगः कः?"

(A) केवलं समाचारश्रवणाय

(B) केवलं गानश्रवणाय

(C) शिक्षाय दृश्यश्रव्यसाधनरूपेण

(D) केवलं मनोरंजनाय

अन्तर्जालस्य उपयोग: शिक्षाय कथं सहायक:?

(A) केवलं साहित्यशोधाय

(B) केवलं संवादाय

(C) अध्ययन-विज्ञानस्य ज्ञानाय

(D) उपर्युक्तं सर्वम्